गङ्गास्तवः

{॥ गङ्गास्तवः ॥}

श्रीगणेशाय नमः ॥

सूत उवाच --

श्रृणुध्वं मुनयः सर्वे गङ्गास्तवमनुत्तमम् ।

शोकमोहहरं पुंसामृषिभिः परिकीर्तितम् ॥ १॥

ऋषय ऊचुः --

इयं सुरतरङ्गिणी भवनवारिधेस्तारिणी

स्तुता हरिपदाम्बुजादुपगता जगत्संसदः ।

सुमेरुशिखरामरप्रियजलामलक्षालिनी

प्रसन्नवदना शुभा भवभयस्य विद्राविणी ॥ २॥

भगीरथरथानुगा सुरकरीन्द्रदर्पापहा

महेशमुकुटप्रभा गिरिशिरःपताका सिता ।

सुरासुरनरोरगैरजभवाच्युतैः संस्तुता

विमुक्तिफलशालिनी कलुषनाशिनी राजते ॥ ३॥

पितामहकमण्डलुप्रभवमुक्तिबीजा लता

श्रुतिस्मृतिगणस्तुतद्विजकुलालवालावृता ।

सुमेरुशिखराभिदा निपतिता त्रिलोकावृता
सुधर्मफलशालिनी सुखपलाशिनी राजते ॥ ४॥

चरद्विहगमालिनी सगरवंशमुक्तिप्रदा
मुनीन्द्रवरनन्दिनी दिवि मता च मन्दाकिनी ।
सदा दुरितनाशिनी विमलवारिसन्दर्शन-
प्रणामगुणकीर्तनादिषु जगत्सु संराजते ॥ ५॥

महाभिषसुताङ्गना हिमगिरीशकूटस्तना
सफेनजलहासिनी सितमरालसच्चारिणी ।
चलल्लहरिसत्करा वरसरोजमालाधरा
रसोल्लसितगामिनी जलधिकामिनी राजते ॥ ६॥

क्वचिन्मुनिगणैः स्तुता क्वचिदनन्तसम्पूजिता
क्वचित्कलकलस्वना क्वचिदधीरयादोगणा ।
क्वचिद्रविकरोज्ज्वला क्वचिदुदग्रपाताकुला
क्वचिज्जनविगाहिता जयति भीष्ममाता सती ॥ ७॥

स एव कुशली जनः प्रणमतीह भागीरथीं
स एव तपसां निधिर्जपति जाह्नवीमादरात् ।
स एव पुरुषोत्तमः स्मरति साधु मन्दाकिनीं
स एव विजयी प्रभुः सुरतरङ्गिणीं सेवते ॥ ८॥

तवामलजलाचितं खगसृगालमीनक्षतं

चलल्लहरिलोलितं रुचिरतीरजम्बालितम् ।

कदा निजवपुर्मुदा सुरनरोरगैः संस्तुतोऽप्यहं

त्रिपथगामिनि प्रियमतीव पश्याम्यहो ॥ ९॥

त्वत्तीरे वसतिं तवामलजलस्नानं तव प्रेक्षणं

त्वन्नामस्मरणं तवोदयकथासंलापनं पावनम् ।

गङ्गे मे तव सेवनैकनिपुणोऽप्यानन्दितश्चादृतः

स्तुत्वा चोद्गतपातको भुवि कदा शान्तश्चरिष्याम्यहम् ॥ १०॥

इत्येतदृषिभिः प्रोक्तं गङ्गास्तवनमुत्तमम् ।

स्वर्ग्यं यशस्यमायुष्यं पठनाच्छ्रवणादपि ॥ ११॥

सर्वपापहरं पुंसां बलमायुर्विवर्धनम् ।

प्रातर्मध्याह्नसायाह्ने गङ्गासान्निध्यता भवेत् ॥ १२॥

इत्येतद्भार्गवाख्यानं शुकदेवान्मया श्रुतम् ।

पठितं श्रावितं चात्र पुण्यं धन्यं यशस्करम् ॥ १३॥

अवतारं महाविष्णोः कल्केः परममद्भुतम् ।

पठतां शृण्वतां भक्त्या सर्वाशुभविनाशनम् ॥ १४॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे

ऋषिकृतो गङ्गास्तवः सम्पूर्णः ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by PSA EASWARAN psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ्today

http://sanskritdocuments.org

Ganga Stavam Lyrics in Devanagari PDF
% File name : gangAstavakalkIP.itx
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
% Proofread by : Dinesh Agarwaa, by PSA EASWARAN psaeaswaran at gmail.coml
% Description-comments : shrIkalkipurANe.anubhAgavate bhaviShye tRityA.nshe
% Latest update : May 18, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built

the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website